## ब्राह्मणमाणववाडवाद्यन्। (४२/१२५०)

ब्राह्मणादिभ्यः शब्देभ्यो यन् प्रत्ययो भवति तस्य समूहः इत्येतस्मिन् [1]विषये। नकारः स्वरार्थः। ब्राह्मणानां समूहः ब्राह्मण्यम्। माणव्यम्। वाडव्यम्।

[४१८] यन्प्रकरणे पृष्ठादुपसङ्ख्यानम्। (म.भा.२.२७९)

[2]पृष्ठानां समूहः [3]पृष्ठ्यः।

[४१९] अह्नः खः क्रतौ। (म.भा.२.२७९)

अह्नां समूहः '[4]अहीनः क्रतुः' (काठ. सं.२४.१०)। [5]क्रतौ इति किम्? आह्नः। खण्डिकादिषु दर्शनादञ् भवति।

[४२०] पर्श्वा णस् वक्तव्यः। (म. भा. २. २७९)

पर्शूनां समूहः पार्श्वम्। [6]पदसञ्ज्ञकत्वाद् गुणो न भवति।

[४२१] [7]वातादूलः।

वातानां समूहः वातूलः॥

## ग्रामजनबन्धुसहायेभ्यस्तल्। (४३/१२५१)

ग्रामादिभ्यः तल् प्रत्ययो भवति तस्य समूहः इत्येतस्मिन् [8]विषये। ग्रामाणां समूहः ग्रामता। जनता। बन्धुता। सहायता।

[४२२] गजाच्चेति वक्तव्यम्। (म. भा. २.२७९)

गजानां समूहः गजता॥

## अनुदात्तादेरञ्। (४४/१२५३)

अनुदात्तादेः शब्दादञ् प्रत्ययो भवति तस्य समूहः इत्येतस्मिन् [9]विषये। कपोतानां समूहः कापोतम्। मायूरम्। [10]तैत्तिरम्॥

---

1. अर्थे फ. 2. पृष्ठानां समूहः नास्ति फ. 3. पृष्ठ्यम् ब. फ, पृष्ठ्यः अ.ड.ह्.क. 4. अहीनः क्रतुः नास्ति ब. फ. 5. वाक्यमिदं नास्ति ब. 6. वाक्यमिदं नास्ति ब. 7. वातात् – वातूलः नास्ति ब. फ. क. ह्. 8. अर्थे फ. 9. अर्थे फ. 10. तैत्तिरीयम् ग.